# संस्कृत-वार्ता:

दिनाङ्क : 21/01/2026 सायम् - 06:20

<u>आदौ मुख्यवार्ता:</u>

- केन्द्रेण त्रिंशदेकत्रिंशदुत्तरद्विसहस्रतम वर्षपर्यन्तं अटल् पेन्शन् योजनायाः अनुवर्तनं स्वीकृतम्; सहैव हि स्माल्-इण्डस्ट्रीस्-डेवेलप्मेण्ट्-ब्याङ्क्-आफ़्-इण्डिया इत्यत्र पञ्च-सहस्रकोटिरूप्यकाणां निवेशस्य निर्णयः कृतः।
- विदेशमन्त्री डा. एस्. जयशङ्करः नवदेहली-नगरे स्पेन्-देशस्य समकक्षीयेण जोस मेनुयल अल्बरेस ब्युनो इत्यनेन सह मिलितवान्; आतङ्कवादेति विषये वैश्विक-शून्य-सहिष्णुतायाः आवाहनञ्च अकरोत्।
- नवदेहली-नगरे लोकतन्त्रनिर्वाचनयोः व्यवस्थापनमिति विषये भारत-अन्ताराष्ट्रिय-सम्मेलनमित्यस्य शुभारम्भोऽभवत्; मुख्य-निर्वाचनायुक्तश्च भारतस्य प्राचीन-लोकतान्त्रिक-व्यवस्थां प्रकाशितवान्।
- भारतीय-मूलीया अन्तरिक्षयात्रिका सुनीता विलियम्स् इत्येषा सप्तविंशति-वर्षाणां उल्लेखनीयसेवायाः अनन्तरं नासा-संस्थायाः सेवानिवृत्तिं प्राप्नोत्।
- पुरुष-क्रिकेट-क्रीडायां भारत-न्यूजीलैण्ड्-देशयोर्मध्ये पञ्च-टी-20-इति अन्ताराष्ट्रिय-क्रीडा-शृङ्खला अद्य सायङ्काले नागपुरे आरप्स्यते।

--------------------------

<u>कैबिनेट अटल पेन्शन योजना</u>

अद्य सर्वकारेण विंशति-त्रिंशत्-एकत्रिंशत् इति वर्षपर्यन्तं अटल-पेन्शन-योजनायाः अनुवर्तनं, प्रचार-विकास-कार्याणां कृते वित्तपोषणस्य विस्तारः च स्वीकृतः। असङ्गठितक्षेत्रस्य कर्मचारिभ्यः वृद्धावस्थायाम् आयस्य सुरक्षां प्रदातुं पञ्चदशोत्तरद्विसहस्र-तमवर्षस्य मई-मासे इयं योजना आरब्धा। अद्य नवदेहली-नगरे प्रधानमन्त्रिणः नरेन्द्रमोदीवर्यस्य आध्यक्ष्ये आयोजितायां वरिष्ठमन्त्रि-सभायाम् अयं निर्णयः कृतः। एषा योजना अभिदातॄणां योगदानाधारेण षष्ठि-वयसः

अनन्तरं प्रतिमासं एकसहस्रतः पञ्चसहस्रपर्यन्तं निश्चितं न्यूनतमं निवृत्तिवेतनम् प्रदीयते। अद्यावधि अस्याः योजनायाः अन्तर्गतं सार्धाष्टकोटितोऽधिकाः अभिदातारः नामाङ्किताः सन्ति। योजनैषा देशस्य समावेशी-सामाजिक-सुरक्षा-संरचनायाः आधारशिला अस्तीति सिध्यते।

---------------------------

## जयशङ्करः- स्पेनिश विदेशमन्त्री

विदेश-कार्यमन्त्री डा. एस. जयशङ्करः अवदत् यत्, राष्ट्रैः सह बद्धप्रतिसन्धिः विशेषतः आतङ्कवादस्य निवारणे सहयोगः पूर्वकालात् अधिकः आवश्यकः अस्तीति। डा. जयशङ्करः अद्य नवदेहल्यां स्पेन्-देशस्य समकक्षीयेण जोस् मेनुयल् अल्बरेस् ब्युनो इत्यनेन सह वार्तालापस्य आरम्भे उक्तवान् यत् भारत-स्पेन्-देशौ आतङ्कवाद- पीडितौ स्तः। सः अधोरेखितवान् यत् वैश्विकव्यवस्थायां गहनपरिवर्तनं प्रचलति, विश्वञ्च भयोत्पादकेति विषये शून्यं सहिष्णुतां स्वीकर्तुम् अर्हतीति। डॉ. जयशङ्करः अवदत् यत् अग्रिमे मासे नवदेहल्यां आर्टिफिसियल् इन्टेलिजेन्स् (ए. आई.) इम्पैक्ट समिट् 2026 इत्यस्य आतिथ्यं भारतं करिष्यति। सः उक्तवान् यत् ए.आई. इति विषये भारतस्य दृष्टिकोणः मानवकेन्द्रितः, सर्वसमावेशकः, उत्तरदायी-नैतिकमूल्येषु केन्द्रितश्च अस्ति, सहैव हि निकटतया यूरोप-देशस्य दृष्टिकोणानुरूपमपि अस्ति। मन्त्री अवदत् यत् अस्मिन् वर्षे भारत-स्पेन-देशयोः राजनैतिक-सम्बन्धस्य सप्ततिः वर्षाणि पूर्णानि सन्ति, स्पेन-देशश्च यूरोपीय-सङ्घे भारतस्य महत्त्वपूर्णेषु व्यापारसहभागिषु अन्यतमः अस्ति च।

---------------------------

## ईसीआई-त्रि-दिवसीय-सम्मेलनम्

मुख्य-निर्वाचनायुक्तः ज्ञानेश-कुमारः अवदत् यत् मतदानकेन्द्र-स्तरीयाः अधिकारिणः देशस्य निर्वाचन-लोकतन्त्रस्य आधारस्तम्भाः सन्तीति। कुमारः अद्य नवदेहली-नगरे लोकतन्त्रं तथा

निर्वाचनप्रबन्धनं 2026 इति विषये भारत-अन्ताराष्ट्रियसम्मेलनं सम्बोधयन् आसीत्। सः अवदत् यत्, भारतं लोकतन्त्रस्य जननी अस्ति तथा च प्रत्येकस्य योग्य-निर्वाचकस्य समावेशेन सह शुद्ध-निर्वाचक-सूचीं निर्वोढुं लोकतन्त्रस्य सुदृढीकरणाय आवश्यकम् अस्ति। त्रिदिवसीये सम्मेलने विश्वस्य सप्ततितोऽधिकानां देशानाम् प्रतिनिधित्वं कुर्वन्तः प्रायः शतं अन्ताराष्ट्रियप्रतिनिधयः भागं गृह्णन्तः सन्ति।

---------------------------

<u>कैबिनेट-लघुद्योग-कोशसंघः</u>

केन्द्रीयमन्त्रिमण्डलेन भारतीय-लघु-उद्योग-विकास-वित्तकोषाय पञ्च-सहस्र-कोटिरूप्यकाणां इक्विट्याख्यं-समर्थनं स्वीकृतम्। अद्य प्रातः प्रधानमन्त्रिणः नरेन्द्रमोदिनः अध्यक्षतायां सभया अयं निर्णयः कृतः। अनेन कार्येण प्रायः पादोन षड्विंशति- लक्षसंख्यकेभ्यः मध्यमलघूद्योगिभ्यः आर्थिकलाभाः प्रदास्यन्ते।

---------------------------

<u>अश्विनी-ए.आई. दावोसः</u>

केन्द्रीय-इलेक्ट्रानिक्स् अथ सूचना-तन्त्रज्ञान-मन्त्री अश्विनी-वैष्णवः अवदत् यत् ए.आई. इत्यस्य विनियमने न केवलं स्वतन्त्रनियमानामनुपालनं स्यात् अपितु टेक्नो-लीगल इति पद्धत्याः अनुसरणमपि कर्तव्यमिति। सः ह्यः दावोस-नगरे विश्व-आर्थिक-मञ्चे भाषणं कुर्वन् एतदुक्तवान् यत् पक्षपातः, गहन-मिथ्याचारेत्यादीनां सङ्कटानां निवारणार्थं दृढ-तान्त्रिक-साधनानां आवश्यकतायाः विषये अवधानं दातव्यमिति। सः इत्यपि अवदत् यत्, भारतं पक्षपातं न्यूनीकर्तुं, विश्वसनीयं गहनं मिथ्या-अभिज्ञानम् समर्थयितुं, तथा च ए. आई. माडेल्स् इत्यस्य प्रयोगात् पूर्वं समुचितं अज्ञानं सुनिश्चितं कर्तुं प्रौद्योगिकीः विकासयतीति। अत्रान्तरे, श्री वैष्णवः दावोस-नगरे विश्व-आर्थिक-मञ्चस्य पार्श्वे आई. बी. एम्. संस्थायाः सी. ई. ओ. अरविन्द-कृष्णं अथ च मेटा-संस्थायाः मुख्य-वैश्विक-कार्य-अधिकारी जोयल् कप्लान् इत्येतमपि

मिलितवान्। सामाजिक-प्रसार-माध्यमे मन्त्री अवदत् यत् विश्वदृष्ट्या भारतं वैश्विक-नवान्वेषणस्य प्रमुख-चालक-रूपेण अस्तीति।

---------------------------

## गणतन्त्रदिवसस्य सन्नद्धता

सप्तसप्ततितमः गणतन्त्रदिवसः आसन्नः अस्ति। नवदेहली-नगरस्य कर्तव्यपथे गणतन्त्रदिवसोत्सवस्य सज्जताः पूर्णतया प्रचलन्ति। विभिन्नक्षेत्राणां प्रायः दश सहस्रजनाः विशेष-अतिथि-रूपेण परेड्-इत्यस्य साक्षिणः भविष्यन्ति। पथसञ्चलेऽस्मिन् देशस्य संस्कृतिः, तस्य सैन्यशक्तिः, तस्य प्रसिद्धपरम्परायाः च अद्वितीयं मिश्रणं प्रदर्शयिष्यते।

---------------------------

## रुसिया-ग्रीनल्यान्डः

रशियादेशस्य विदेशमन्त्री सर्गी लैव्रोव इत्येषः उक्तवान् यत् ग्रीन्-लेण्ड्-देशः डेन्मार्क्-देशस्य स्वाभाविकः भागः नास्तीति, एतत् संयुक्तराष्ट्रसङ्घस्य शासनपत्रस्य भावस्य उल्लङ्घनं कुर्वन् उपनिवेशवादस्य परम्परा अस्तीति च। ह्यः वार्तालापसम्मेलने भाषमाणः लैवरोवः अवदत् यत्, ग्रीन्-लेण्ड् इतीदं ऐतिहासिकरूपेण नार्वे-डेन्मार्क्-देशयोः उपनिवेशः आसीत्, विंशति- शताब्द्याः मध्यभागे एव डेन्मार्क्-देशस्य सम्बद्ध-प्रदेशः अभवत्। श्रीलैवरोवः ट्रम्पस्य विचारं दृढतया निराकृतवान् यत् । सः अवदत् यत्, अमेरिकादेशस्य राष्ट्रपतिना डोनाल्ड् ट्रम्प् इत्यनेन ग्रीन्-लैण्ड-देशस्य अधिकारग्रहणस्य प्रयासः उत्तर-अट्लाण्टिक्-सन्धि-सङ्घटनस्य कृते गभीरनसङ्कटञ्च सूचयतीति।

---------------------------

## सुनीता विलियम्स

मानव-अन्तरिक्षयानस्य इतिहासे अत्यन्तनिपुणतमेषु अन्तरिक्षयात्रिकेषु अन्यतमा सुनीता विलियम्स इत्येषा सप्तविंशतिवर्षेभ्योऽपि अधिककालस्य उत्कृष्ट-जीवनवृत्तेः अनन्तरम् नासा इत्याख्यया अमेरिकीय-अन्तरिक्ष-संस्थायाः सेवानिवृत्तिं प्राप्नोत्।

---------------------------

**क्रिकेट:**

पुरुष-क्रिकेट-क्रीडायां अद्य नागपुरे पञ्च-क्रीडा-शृङ्खलायाः प्रथमायां टी-20-क्रीडायां भारतं न्यूज़ीलैण्ड्-देशेन सह क्रीडति। क्रीडा सायं सप्तवादने आरप्स्यते। अग्रिमे मासे निर्धारितस्य पुरुषाणां टी-20 विश्वकप इति क्रीडायाः सज्जतायाः भागरूपेण, सूर्यकुमार् यादवस्य नेतृत्वे भारतीयदलाय एषा महत्त्वपूर्ण-शृङ्खला अस्तीति मन्यते।

।। इति वार्ताः ।।